# Ramanuja Vaibhava Stotram

# रामानुजवैभवस्तोत्रम्

## Document Information

Text title : rAmAnujavaibhavastotram

File name : rAmAnujavaibhavastotram.itx

Category : deities_misc, stotra, gurudev

Location : doc_deities_misc

Author : Rangarya

Transliterated by : Mohan Chettoor

Proofread by : Mohan Chettoor, NA

Description-comments : Ramanuja Sampradaya. (Prayer to Shri Ramanujacharya, advice)

Latest update : June 6, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 6, 2022

*sanskritdocuments.org*

# रामानुजवैभवस्तोत्रम्

श्रीमन्नारायणस्वामिन् शठकोपं प्रदेहि मे ।
रामानुजं प्रदेहि त्वं शठकोपं मुनीश्वर ॥ १॥

प्रदेहि मे दाशरथिं रामानुज दयानिधे ।
भवाब्धौ मज्जमानं मां करुणाब्धे समुद्धर ॥ २॥

त्वमेव मे पिताः माता शरण्यश्च गुरुर्गतिः ।
त्वां विनाऽन्या गतिः स्वामिन्नहि कुत्रापि विद्यते ॥ ३॥

घोरे कलियुगे ह्यस्मिन्सर्वधर्मविवर्जिते ।
संसारतरणोपायो नान्यस्त्वच्चरणात्प्रभो ॥ ४॥

ततोऽनन्यगतिं दीनं दीनबन्धो दयार्णवः ।
पाहि मां पापिनं घोरं रामानुजजगद्गुरो ॥ ५॥

संसारतापसन्दग्धश्शीतहेतुविवर्जितः ।
रामानुजपदाम्भोजच्छायाविश्राममाश्रये ॥ ६॥

सर्वमङ्गलमाङ्गल्यं सर्वोपद्रवनाशनम् ।
वन्दे रामानुजार्यस्य नित्यं पादाम्बुजद्वयम् ॥ ७॥

केचित्कर्मादियोगेषु विद्वांसोऽभिरता जनाः ।
वयन्तु यतिराजस्य पादपद्मैकसंश्रयाः ॥ ८॥

भोगैश्वर्यपराः केचित्केचित्कैवल्यमीप्सवः ।
वयन्तुशृङ्खलालग्ना रामानुज दयानिधे ॥ ९॥

त्वत्पादाम्भोजमाश्रित्य निखिलोपायवर्जितः ।
तरिष्यामोञ्जसा नूनं मृत्युसंसारसागरम् ॥ १०॥

नमोऽस्तु सर्वार्तिविनाशहेतवे
ह्यनन्तपापेन्धनदावकीलिने ।

निजाश्रितानां भवसिन्धुसेतवे
यतीन्द्रपादाम्बुजकामधेनवे ॥ ११॥

अखिलदुरितपुञ्जध्वंसनंदेहभाजां-
भवजलनिधिपाते पावनं पावनानाम् ।
परमपुरुषधामप्रापकं स्वाश्रितानां
यतिपति पदपद्मं श्रेयसे संश्रयामि ॥ १२॥

नमामि रामानुजपादपङ्कजं
वदामि रामानुजनाम निर्मलम् ।
स्मरामि रामानुजदिव्यविग्रहं
करोमि रामानुजदासदासताम् ॥ १३॥

रामानुजस्य पदपङ्कजमाश्रयामि
रामानुजस्य करुणामनुसन्दधामि ।
रामानुजस्य जनपादरजो वहामि
रामानुजाय नम इत्यनिशं वदामि ॥ १४॥

बौद्धान्धकारपरिहारदिवाकराय
श्रीवैष्णवाम्बुनिधिपूर्णनिशाकराय ।
अद्वैतवादिकरियूथमृगाधिपाय
तस्मै नमोऽस्तु सततं यतिपुङ्गवाय ॥ १५॥

लोकानुद्धर्त्तुकामो धृतमनुजवपुर्भूतले योऽवतीर्णो
निर्जित्याशेषदुष्टान् कुमतिमतपरान्वैष्णवङ्कर्मतेने ।
ब्रह्मेशानाद्यलभ्यं निखिलपतिपदं दत्तवांश्चाश्रितानां
श्रीमान् रामानुजो नो भवभुजगमुखात्पातु नित्यं दयालुः ॥ १६॥

स्वपदाम्बुजसंश्रितपापहरं सकलश्रुतिसारयथार्थकरम् ।
जयनादिविनाशनदण्डधरं प्रणमामि यतीश्वरमादिगुरुम् ॥ १७॥

प्रकटीकृतमाधवभक्तिपथं कलिपातकमोचनपुण्यकथम् ।
परिभूतनिरीश्वरवादिमतं यतिराजगुरुं प्रणमामि सदा ॥ १८॥

कृमिकण्ठनरेशनिषूदकरं भवरोगविनाशनवैद्यवरम् ।
शरणागतवत्सलवारिनिधिम्प्रणमामि सदायतिभूमिपतिम् ॥ १९॥

नमो रामानुजार्याय कल्याणगुणसिन्धवे ।

कृपामात्रप्रसन्नाय दीननिर्व्याजबन्धवे ॥ २०॥

प्रथमोऽनन्तरूपश्च द्वितीयो लक्ष्मणस्तथा ।
तृतीयो बलरामश्च कलौ रामानुजो मुनिः ॥ २१॥

द्वापरान्ते कलेरादौ पाखण्डप्रचुरे जने ।
रामानुजेति भविता विष्णुधर्मप्रवर्त्तकः ॥ २२॥

सर्वलोकसमुद्धर्त्रे कृमिकण्ठविनाशिने ।
नारायणप्रतिष्ठात्रे प्रपन्नसुरसाक्षिणे ॥ २३॥

त्रिदण्डहस्तं सितयज्ञसूत्रं काषायवस्त्रं लसदूर्ध्वपुण्ड्रम् ।
रथाङ्गशङ्खाङ्कितबाहुमूलं रामानुजार्यं शरणं प्रपद्ये ॥ २४॥

इति श्रीब्रह्मसंहितायां रामानुजवैभवस्तोत्रं सम्पूर्णम् ॥

Encoded and proofread by Mohan Chettoor

*Ramanuja Vaibhava Stotram*
pdf was typeset on June 6, 2022

Please send corrections to *sanskrit@cheerful.com*